**शिक्षा निदेशालय, राष्ट्रीय राजधानी क्षेत्र, दिल्ली**

वार्षिक–पाठ्यक्रमः  कक्षा –षष्ठी

सत्रम्– **2026-27**    विषयः–संस्कृतम्

दीपकं पाठ्यपुस्तकाधारितः पाठ्यक्रमः

| पाठ्यवस्तु | व्याकरणबिन्दवः | अधिगमोद्देश्यानि | अधिगमसम्प्राप्तयः | गतिविधयः |
|---|---|---|---|---|
| **१. प्रथमः पाठः**<br>वयं वर्णमालां पठामः | (१) स्वराः– ह्रस्वदीर्घस्वराणां परिचयः।<br>गुणिताक्षराणाम् अभ्यासः।<br>वर्णसंयोजन–वर्णवियोजनविधिना<br>संयुक्तवर्णयुक्तशब्दानामभ्यासः। | सम्यग्  वर्णमालां जानन्ति।<br>वर्णसंयोजने वर्णविच्छेदे छात्राणां<br>निपुणत्वं विधास्यति। | वर्णमालायां दक्षाः भवन्ति।<br>सुष्ठु शब्दनिर्माणविधिं<br>जानन्ति। | परस्परं नाम प्रश्नमाध्यमेन आत्मपरिचयं दास्यन्ति।<br>पाठे प्रदत्तान् अभ्यासप्रश्नान् आधारीकृत्य<br>गतिविध्यात्मक– कक्षाभ्यासस्य आयोजनम्। |
| **२. द्वितीयः पाठः**<br>संयुक्तव्यञ्जनानि | (२) व्यञ्जनानि– कारभ्य हकारपर्यन्तं<br>वर्णबोधः।<br>गुणिताक्षराणाम् अभ्यासः।<br>वर्णसंयोजन–वर्णवियोजनविधिना<br>संयुक्तवर्णयुक्तशब्दानामभ्यासः। | वर्णसंयोजने वर्णविच्छेदे छात्राणां<br>निपुणत्वं विधास्यति।<br>नामविधिना आत्मपरिचयं<br>कथयिष्यन्ति। | सुष्ठु शब्दनिर्माणविधिं<br>जानन्ति।<br>स्वनामपरिचयं संस्कृतेन वक्तुं<br>समर्थाः भवन्ति। | आत्मपरिचयः<br>पाठे प्रदत्तान् अभ्यासप्रश्नान् आधारीकृत्य<br>गतिविध्यात्मक– कक्षाभ्यासस्य आयोजनम्। |
| **३. तृतीयः पाठः**<br>एषः कः ? एषा का ?<br>एतत् किम् ? | पुल्लिङ–स्त्रीलिङ–नपुंसकलिङपरिचयः<br>एतत्, तत्, किम्  एतेषां प्रथमाविभक्तौ<br>त्रिषु लिङ्गेषु  त्रिषु वचनेषु च अभ्यासः।<br>अभिनयमाध्यमेन सर्वनामपरिचयः।<br>क्रियापदपरिचयः - लट्लकारे<br>प्रथमपुरुषस्य त्रिषु वचनेषु अभ्यासः। | संज्ञासर्वनामशब्दानां परिचयं<br>प्रददाति।<br>लिङ्गस्य सामान्यपरिचयं जानन्ति<br>वाक्यनिर्माणं जानाति।<br>धातुरूपाणि प्रथमपुरुषस्य त्रिषु<br>वचनेषु जानन्ति। | पुल्लिङ्ग स्त्रीलिङ्ग–<br>नपुंसकलिङ्गपरिचयं<br>प्राप्नुवन्ति।<br>सर्वनामशब्दान् जानन्ति।<br>संज्ञा–सर्वनामशब्दानाम्<br>पृथक्करणे नैपुण्यं प्राप्नुवन्ति। | • अकारान्त–आकारान्ताः विविध धातुरूपाणां बोधनाय विविधक्रियानां गतिविधिमाध्यमेन बोधः कारयिष्यति।<br>पुल्लिङ्ग–स्त्रीलिङ्ग–नपुंसकलिङ्ग शब्दान् छात्राः जानीयुः, एतदर्थं शिक्षकः गतिविध्याधारितं शिक्षणं कुर्यात् |
| | मध्यम–उत्तमपुरुषयोः त्रिषु वचनेषु | त्रिषु लिङ्गेषु समानरुपेण | मध्यमोत्तमपुरुषयोः प्रयोगं | सम्भाविताः गतिविधयः – |

| | | | | |
|---|---|---|---|---|
| **४. चतुर्थः पाठः**<br>अहं च त्वं च | अभ्यासः।<br>‘अस्’धातोः लट्लकारे सम्पूर्णं रूपं जानाति। | संक्षिप्तवाक्यरचनां जानन्ति। | जानन्ति। | I. चर्चितपदानि प्रयुज्य सरलवाक्यनिर्माणम्।<br>II. आत्मपरिचयकथनम्।<br>III. परस्परवार्तालापस्य आयोजनम्।<br>IV. अभिभावकैः सह कृतसम्भाषणस्य लेखनम्। |
| **५. पञ्चमः पाठः**<br>सङ्ख्यागणना ननु सरला | गीत–माध्यमेन संख्याशिक्षणम्। एकतः पञ्चाशत् पर्यन्तं संख्याबोधः<br>अङ्कतः शब्देषु संख्याज्ञानम्। | संख्यां जानीयुः। | संख्यां जानन्ति। | I. एकश्वाससंख्याकथनम्।<br>II. संख्यान्वेषणम्।<br>III. एकतः पञ्चाशत्पर्यन्तं संख्याकथनम् ।<br>IV. स्यूते स्थितानां वस्तूनाम् उत पार्श्वस्थितानां वस्तूनां संख्यालेखनम्। |
| **६. षष्ठः पाठः**<br>अहं प्रातः उत्तिष्ठामि | दिनचर्याकथनमाध्यमेन उत्तमपुरुषस्य अभ्यासः।<br>समयशिक्षणम्। (पूर्ण–ऊन–सार्ध–सपादम्) | उत्तमपुरुषं जानन्ति।<br>समयेन परिचिताः भवन्ति | भाषायां समयं कथयन्ति। | घटिकानिर्माण–गतिविधिः।<br>पाठे प्रदत्तान् अभ्यासप्रश्नान् आधारीकृत्य गतिविध्यात्मक– कक्षाभ्यासस्य आयोजनम्। |
| **७. सप्तमः पाठः**<br>शूराः वयं धीराः वयम् | गीतविधिना उत्तमपुरुषे सरलवाक्यरचनां कुर्वन्ति | सर्वनामशब्दैः सह उत्तमपुरुषस्य बहुवचनं जानन्ति। | वाचनकौशलेन भाषायाम् अभिव्यक्तिं कुर्वन्ति । | क्रीडाङ्गणे गत्वा प्रकृत्यादिकं कमप्येकं विषयमाधृत्य छात्राः एकम्– एकं वाक्यं रचयित्वा वदेयुः। |
| **८. अष्टमः पाठः**<br>सः एव महान् चित्रकारः | वर्णपरिचयः<br>पुष्पाणां नामानि | वर्णपरिचयं जानन्ति | वर्णज्ञाने समर्थाः भवन्ति। | कस्मै कः वर्णः रोचते? इत्यादिमाध्यमेन आरभ्य दैनन्दिनजीवने प्रयुक्त– वर्णाधारित–गतिविधिः। |

**पाठ्यक्रमः 5 सितम्बर 2026 पर्यन्तं पूर्णं कारणीयम् ।**

**मध्यावधिः पाठ्यक्रमस्य पुनरावृत्तिः ।**

**मध्यावधि-परीक्षा**

| **पाठपरिचयः** | **व्याकरणबिन्दवः** | **अधिगम–उद्देश्यानि** | **अधिगमसम्प्राप्तिः** | **गतिविधयः** |
|---|---|---|---|---|
| **९. नवमः पाठः** | अव्ययपरिचयः | येषां रूपाणि न चलन्ति तानि | रोचककथामाध्यमेन छात्राः | समूहगतिविधिः घटे अव्ययानां चिटिकाः संस्थाप्य |

| | | | | |
|---|---|---|---|---|
| अतिथिदेवो भव | | अव्ययानि भवन्ति, तेषां परिचयं प्राप्नुवन्ति। | अव्ययशब्दान् जानन्ति। गद्यविधायां पठनकौशलं च प्राप्नुवन्ति। | यस्य अव्ययस्य चिटिका यस्य पार्श्वे आगच्छति सः तम् अव्ययं स्वीकृत्य वाक्यं कथयति, यः वाक्यनिर्माणे असमर्थः सः समूहात् बहिर्भवति, तस्य अव्ययं स्वीकृत्य समीवर्ति अन्यः बालः वाक्यं कथयति। |
| **१०. दशमः पाठः** बुद्धिः सर्वार्थसाधिका | क्रियापदपरिचयः–खेल्, पठ्,पिब्, खाद्, गच्छ्, धाव्, भू, कृ हस् इत्यादीनां धातूनां लट्लकारे अभ्यासः। | वाक्ये क्रियापदप्रयोगे समर्थाः भवेयुः। | क्रियापदानां परिज्ञाने समर्थाः भवन्ति। | I. क्रियापदानां कथनस्य स्पर्धायाः आयोजनम्।<br>II. कथासु क्रियापदपूर्तिः।<br>III. दैनन्दिनव्यवहारे प्रयुक्तानां क्रियापदानां लेखनम्।<br>IV. वचनानुगुणं क्रियापदपरिवर्तनम्। |
| **११. एकादशः पाठः** यो जानाति सः पण्डितः | शब्दानां षष्ठीविभक्तौ त्रिषु लिङ्गेषु प्रयोगे समर्थाः भवेयुः। | प्रहेलिकायाः माध्यमेन तार्किकक्षमतायाः विकासः। | षष्ठीविभक्त्या परिचिताः भवन्ति। | I. प्रहेलिकायाः उत्तरकथनप्रतियोगितायाः आयोजनम्।<br>II. प्रथमाविभक्तितः षष्ठीविभक्तिं त्रिविधलिङ्गशब्दानां परिवर्तनम्।<br>III. पाठे प्रदत्तं रेखाचित्रम् आधारीकृत्य स्वकुटुम्बस्य रेखाचित्रस्य निर्माणम्।<br>IV. नूतनप्रहेलिकानां सङ्कलनं प्रस्तुतिकरणञ्च। |
| **१२. द्वादशः पाठः** त्वम् आपणं गच्छ | पठ्-खेल्-पिब्-खाद्-गच्छ्-धाव्-भू-कृ-हस्-क्रियापदानां लोट्लकारे अभ्यासः। | लोट्लकारस्य रूपाणि ज्ञात्वा वाक्ये प्रयोगं कुर्युः। | लोट्लकारेण परिचिताः भवन्ति। कथायाः रसास्वादं कुर्वन्ति। | लोट्लकारे वाक्यप्रयोगः परिवर्तनाभ्यासश्च यथा - पठति-पठतु। वदसि-वद । चलामि-चलानि। एवमेव अन्यवाक्यानाम् अभ्यासः कारणीयः। पाठे प्रदत्तान् अभ्यासप्रश्नान् आधारीकृत्य गतिविध्यात्मक–कक्षाभ्यासस्य आयोजनम्। |
| **१३. त्रयोदशः पाठः** | अभिनयपूर्वकं सस्वरगायनम्। | पद्यविधायां पठनकौशलं च | पद्यगायने समर्थाः भवन्ति। | पद्यस्पर्धां द्वारा श्लोकान् गास्यन्ति, श्लोकान् स्मरिष्यन्ति च। |

| | | | | |
|---|---|---|---|---|
| पृथिव्यां त्रीणि रत्नानि | कण्ठस्थीकरणम्, अन्वयादिमाध्यमेन अर्थबोधः | जानीयुः। | | पाठे प्रदत्तान् अभ्यासप्रश्नान् आधारीकृत्य गतिविध्यात्मक– कक्षाभ्यासस्य आयोजनम्। |
| **१४.चतुर्दशः पाठः** आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः | द्वितीयाविभक्तेः परिचयः। | छात्राः तार्किकचिन्तने क्षमाः भवेयुः। समस्यासमाधान–कौशले दक्षाः भवेयुः। छात्राः द्वितीयाविभक्तेः सामान्यप्रयोगे दक्षाः भवेयुः। | समस्यासमाधानकौशले दक्षाः भवन्ति। तार्किक– चिन्तने दक्षाः भवन्ति। द्वितीयाविभक्तेः प्रयोगे दक्षाः भवन्ति। | शिक्षकः समस्यासमाधानकौशलम् आधृत्य गतिविधिमेकं सम्पादयेत्। यथा– पठनान्तरं बाला किं करिष्यन्ति? सर्वे बालाः स्वमन्तव्यं बोधयन्तु। गतिविधिः–२ शिक्षकः छात्रैः सह मिलित्वा द्वितीया–विभक्ति–आधारितं कमपि गतिविधिं सम्पादयेयुः। |
| **१५. पञ्चदशः पाठः** माधवस्य प्रियम् अङ्गम् | तृतीयाविभक्तेः परिचयः। अङ्गपरिचयः | तृतीयाविभक्तेः प्रयोगं जानीयुः। | तृतीयाविभक्तेः प्रयोगं जानन्ति। | शिक्षकः छात्रैः सह मिलित्वा तृतीया–विभक्ति–आधारितं कमपि गतिविधिं सम्पादयेयुः। पाठे प्रदत्तान् अभ्यासप्रश्नान् आधारीकृत्य गतिविध्यात्मक– कक्षाभ्यासस्य आयोजनम्। |
| **१६. षोडश पाठः** वृक्षाः सत्पुरुषाः इव | पद्यपरिचयः | पद्यपरिचयं प्राप्नुयुः। | पद्यपरिचयं प्राप्नुवन्ति। | I. पद्याधारित–चित्ररचना प्रतिस्पर्धायाः आयोजनम्।<br>II. विद्यालये वृक्षारोपणकार्यक्रमस्य आयोजनम्, वृक्षाणां संस्कृतनामानि लेखनम्।<br>III. औषधमूलानां वृक्षाणां/ पादपानां चित्रसहितविवरणलेखनम्<br>IV. "मम प्रियः वृक्षः" – लघुनिबन्धलेखनम्। |

- **पाठ्यक्रमः 30 जनवरी 2027 पर्यन्तं पूर्णं कारणीयम् ।**
- **वार्षिकपरीक्षादृष्ट्या सकलपाठ्यक्रमस्य पुनरावृत्तिः।**
- **वार्षिकमूल्याङ्कनं सकलपाठ्यक्रमात् भविष्यति।**

**वार्षिक-परीक्षा**

## मध्यावधौ वार्षिकपरीक्षायां च मूल्याङ्कनाय पाठाः (70 अङ्काः)

| |
|---|
| १. प्रथमः पाठः वयं वर्णमालां पठामः |
| २. द्वितीयः पाठः संयुक्तव्यञ्जनानि |
| ३. तृतीयः पाठः एषः कः ? एषा का ? एतत् किम् ? |
| ६. षष्ठः पाठ: अहं प्रातः उत्तिष्ठामि |
| ७. सप्तमः पाठः शूराः वयं धीराः वयम् |
| ८. अष्टमः पाठः सः एव महान् चित्रकारः |
| ९. नवमः पाठः अतिथिदेवो भव |
| १२. द्वादशः पाठः त्वम् आपणं गच्छ |
| १३. त्रयोदशः पाठः पृथिव्यां त्रीणि रत्नानि |
| १४. चतुर्दशः पाठः आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः |
| १५. पञ्चदशः पाठः माधवस्य प्रियम् अङ्गम् |

## आन्तरिक–मूल्याङ्कनाय पाठाः

| |
|---|
| ४. चतुर्थः पाठः अहं च त्वं च |
| ५. पञ्चमः पाठः सङ्ख्यागणना ननु सरला |
| १०. दशमः पाठः बुद्धिः सर्वार्थसाधिका |
| ११. एकादश: पाठ: यो जानाति सः पण्डितः |
| १६. षोडश पाठः वृक्षाः सत्पुरुषाः इव |

**टिप्पणी**– उपर्युक्तपञ्चपाठाः लिखितपरीक्षायां मूल्याङ्कनाय न सन्ति। शिक्षकाः विविधगतिविधिषु स्वविवेकेन आन्तरिकमूल्याङ्कनाय एतेषां प्रयोगे स्वतन्त्राः सन्ति।